# कलानां प्रवरंचित्रम।

**अवबोधनम्।**

**अ. सत्यं वा असत्यम् इति लिखत।**

१. विष्णुधर्मोत्तरपुराणे 'नारायण-वज्रसंवाद:' प्रख्यात:।

उत्तर: **असत्यम्**।

२. यथा सुमेरु: नगानां तथा कलानामिह चित्रकल्प: प्रवर:।

उत्तर: **सत्यम्**।

३. कलया केवलं कलावतानां सुखप्राप्ति: भवति।

उत्तर: **असत्यम्**।

४. धर्मकामार्थमोक्षदं चित्रं कलानां प्रवरम् अस्ति।

उत्तर: **सत्यम्**।

५. चित्रकलाया: प्रवर्तक: आसीद् धर्मसुत: नारायण:।

उत्तर: **सत्यम्**।

६. चित्रे अदृश्यकरणं प्रधानं परिकीर्तितम्।

उत्तर: **असत्यम्**।

७. षड्गुणै: चित्रस्य सौंदर्यं प्रवरम् अस्ति।

उत्तर: **असत्यम्**।

**ब. एकपदेन उत्तरं लिखत।**

१. **कस्मिन्** ग्रन्थे चित्रकलाशास्त्रं वर्णितं विद्यते?

उत्तर: **विष्णुधर्मोत्तरपुराणम्**।

२. "लोके-परलोके सुखसाधनं किम्?" इति **केन** पृष्टम्?

उत्तर: **वज्रमहाराजेन।**

३. **क:** चित्रकलाया: श्रेष्ठत्वम् उक्तावान्?

उत्तर: **मार्कण्डेयमुनि:।**

४. नगानां प्रवर: **क:**?

उत्तर: **सुमेरु:।**

५. **क:** अण्डजानां प्रधान:?

उत्तर: **गरुड:।**

६. नराणां प्रवर: **क:**?

उत्तर: **क्षितीश:।**

७. कलानां प्रवर: **क:**?

**उत्तर: चित्रकल्प:।**

८. **क:** चित्रकलाया: प्रवर्तक:?

**उत्तर: नारायण:।**

९. चित्रे **किं** प्रधानं परिकीर्तितम्?

**उत्तर: सादृश्यकरणम्।**

१०. चित्रे **कति** गुणा: अनुस्यूता: भवेयु:?

**उत्तर: अष्टगुणा:।**

## पृथक्करणम्।

### अ. जालचित्रम् / वृक्षरेखाचित्रम्।

१. क: केषां प्रवर: तद् लिखित्वा जालचित्रं पूरयत।

सुमेरु: ___१___

कलानां ___४___

प्रवर:।


___२___ अण्डजानाम्

नराणां ___३___

**उत्तर:** १. **नगानाम्।** २. **गरुड:।**

३. **क्षितीश:।** ४. **चित्रकल्प:।**

२. चित्रे ये अष्टगुणाः अनुस्यूताः भवेयुः ते गद्यांशे चित्वा जालरेखाचित्रे लिखत।




| | | | | |
|---|---|---|---|---|
| **उत्तरः** | १. | **स्थानम्।** | २. | **प्रमाणम्।** |
| | ३. | **मधुरत्वम्।** | ४. | **भूलम्भः।** |
| | ५. | **विभक्तता।** | ६. | **सादृश्यम्।** |
| | ७. | **क्षयः।** | ८. | **वृद्धिः।** |

## अवबोधनम्।

**अ. सत्यं वा असत्यं तद् लिखत।**

१. चित्रकलायां वर्णविन्यासे एव चित्रकारस्य परीक्षा भवति।

उत्तरः **सत्यम्।**

२. त्रयः प्रधानवर्णाः विदिताः।

उत्तरः **असत्यम्।**

३. अवान्तरवर्णानां संख्या अगणिता वर्तते।

उत्तरः **सत्यम्।**

४. श्यामरक्तवर्णौ अतीव महत्तपूर्णौ।

उत्तरः **असत्यम्।**

५. हृदयस्य चित्रणं चित्रे चैतन्यं निर्माति।

उत्तर: **असत्यम्।**

६. भावानां चित्रणं षड्रसानुकूलं कर्तव्यम्।

उत्तर: **असत्यम्।**

**ब. एकपदेन उत्तरं लिखत।**

१. चित्रकारस्य परीक्षा **कस्मिन्** भवति?

उत्तर: **वर्णविन्यासे।**

२. **कति** प्रधानवर्णाः विदिताः?

उत्तर: **पञ्च।**

३. सम्मिश्रणार्थं **कौ** वर्णौ अतीव महत्त्वपूर्णौ?

उत्तर: **श्यामगौरवर्णौ।**

४. चित्रस्य शोभा **कैः** वर्तते?

उत्तर: **रङ्गव्यतिकरैः।**

५. मार्कण्डेयमुनिना **कदा** आयामोच्छायमानवर्णनं कृतम्?

उत्तर: **चित्रसूत्रविवरणे।**

६. **केन** विना चित्रम् आकर्षकं न भवति?

उत्तर: **परिमाणेन।**

७. **के** काव्यशास्त्रे वर्णिताः?

उत्तर: **नवरसाः।**

८. रसानां चित्रणं चित्रे **किं** निर्माति?

उत्तर: **चैतन्यम्।**

९. **कैः** हृदयस्य भावाः प्रकटिताः भवन्ति?

उत्तर: **अङ्गविभङ्गैः।**

१०. भावानां चित्रणं **कथं** कर्तव्यम्?

उत्तर: **नवरसानुकूलम्।**


११. **कीदृशं** चित्रं प्रभावकारि भवति?

उत्तर: **भावयुक्तम्।**

## पृथक्करणम्।

**अ. जालचित्रम् / वृक्षरेखाचित्रम्।**

१. प्रधानवर्णानां नामानि लिखित्वा जालरेखाचित्रं पूरयत।




**उत्तरः १. श्वेतः।**


**२. रक्तः।**

**३. पीतः।**

**४. कृष्णः।**

**५. हरितः।**

२. गद्यांशे चित्रसूत्रस्य घटकान् चित्वा जालचित्रे लिखत।




**उत्तरः १. दैर्घ्यम्।**

**२. उद्गतता।**

**३. अङ्गप्रत्यङ्गम्।**

३. मञ्जूषातः ४ उचितान् शब्दान् चित्वा स्तम्भपूरणं कुरुत।

| प्रधानवर्णौ | संमिश्रणार्थं महत्त्वपूर्णौ वर्णौ |
|---|---|
| १ | ३ |
| २ | ४ |

(हरितः, कषायः, गौरः, कपोतः, पीतः, श्यामः)

उत्तरः १. **हरितः।**

२. **श्यामः।**

३. **पीतः।**

४. **गौरः।**

## अवबोधनम्।

### अ. सत्यं वा असत्यं तद् लिखत।

१. चित्रे मानवानां चित्रणं कथं विधेयम् इति ज्ञापयितुं चित्रलक्षणानि कथितानि।

उत्तरः **असत्यम्।**

२. शान्तप्रकृतिमनुजस्य भ्रूः अर्धचन्द्राकारा भवेत्।

उत्तरः **सत्यम्।**

३. गायकस्य भ्रूः धनुराकारा भवेत्।

उत्तरः **असत्यम्।**

४. ऋषिणां चित्रं भूषणैः अलङ्कृतं आलिखेत्।

उत्तरः **असत्यम्।**

५. चित्रस्य महत्त्वपूर्णमङ्गं लावण्यम्।

उत्तरः **सत्यम्।**

६. कलायां नैपुण्यप्राप्तिः ईश्वरदत्ता।

उत्तरः **असत्यम्।**

**ब. एकपदेन उत्तरं लिखत।**

१. शान्तप्रकृतिमनुजस्य चित्रणसमये भ्रूः **कीदृशी** भवेत्?

**उत्तरः अर्धचन्द्राकारा।**

२. **कस्य** भ्रूः धनुराकारा भवेत्?

**उत्तरः नर्तकस्य।**

३. **केषां** चित्रं भूषणैलङ्कृतम् आलिखेत्?

**उत्तरः देवतानाम्।**

४. चित्रस्य महत्त्वपूर्णमङ्गं **किम्**?

**उत्तरः लावण्यम्।**

५. **का** ईश्वरदत्ता?

**उत्तरः कला।**

६. कलायां **का** मानवाधीना?


**उत्तरः नैपुण्यप्राप्तिः।**

## पृथक्करणम्।

**अ. जालचित्रम् / वृक्षरेखाचित्रम्।**

१. कस्य चित्रं कीदृशं भवेत् इति सङ्केतान् उचिते जालरेखाचित्रे लिखत।

तेजोयुक्तम्, प्रसन्नमुखम्, कृष्णाजिनधारि, धृतक्षौमम्, भूषणैरलङ्कृतम्, जटाजूटयूक्तम्, दुर्बलम्




**उत्तरः**

| | | | |
|---|---|---|---|
| १. | **प्रसन्नमुखम्।** | २. | **धृतक्षौमम्।** |
| ३. | **भूषणैरलङ्कृतम्।** | ४. | **तेजोयुक्तम्।** |
| ५. | **कृष्णाजिनधारि।** | ६. | **जटाजूटयुक्तम्।** |
| ७. | **दुर्बलम्।** | | |